## अध्याय : २ Chapter - 2

सूत उवाच ।।[१]

ततो द्विजैः[२] परिवृतं नारदं देव पूजितम् ।।
अभिगम्यो पजग्राह सर्वानिश्च[३] स पाण्डवः[४] ।। १

ततस्तं नारदः प्राह जयाशति धनंजय
धर्मं भवंति ते बुद्धिदेवेषु ब्राह्मणेषु च ।। २

कश्चित्वदेतां महायात्रां वीर द्वादश वार्षिकीम् ।।
आचरन्क्षिपसे नैवमथ वा कुप्यसे न च ।। ३

मुनीनामपि चेतांसि तीर्थयात्रासु पांडवें[५] ।।
क्षियंति परिकुप्यंति श्रेयसां विघ्नमूलतः ।। ४

कश्चिन्नैतेन दोषेण समाश्लिष्टोऽसि पांडव ।।
अत्र चांगिरसा गीतां गाथामेतां हि शुशुभः ।। ५

यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ।।
निर्विकाशः क्रियाः सर्वाः स तीर्थफलमश्नुते ।। ६

तदिदं हृदि धार्यं ते किं वा त्वं तात मन्यसे ।।
भ्राता युधिष्ठिरो यस्य सखा यस्य स[६] केशवः ।।

---

१ ब श्रीसुत. २ ब द्विजं ३ अ सर्वानिर्यः
४ "पृथक पृथक" अ ब पाठः । परंतु मुदित पुस्तके "पाण्डवः" इति पाठः
५ ह अ पत्री "फाल्गुन" ।। ६ अ सा

पुनरेतत्समुचितं यद्भूपैः शिक्षणं[1] नृणाम् ।।
वयं हि धर्मगुरवः स्थापितास्तेन विष्णुना ।। ८

विष्णुना चात्र शृणुमो गीतां गाथां द्विजान्प्रति ।। ९

यस्यामलामृत[2] यशः श्रवणावगाहः सद्य :
पुनाति जगदाश्वपचाद्विकुंठः ।।
सो हं भवद्भिरुपलब्ध सुतीर्थ कीर्तिश्छिंद्यां
स्वबाहुमपि यः प्रतिकूलवर्ती[3] ।। १)

प्रियं च पार्थ ते ब्रूमो येष्टां कुशलकामुकः ।।
सर्वे कुशलिनस्ते च यादवाः पांडवास्तथा ।। ११

अधुना भीमसेनेन कुरूणामुपतापकः[4]
शासनाद्धृतराष्ट्रस्य वीरवर्मानृपो हतः ।। १२

स हि राज्ञामजेयोऽभूद्यथा पूर्वं बलिर्बली ।।
कंटकं कंटकेनेव धृतराष्ट्रो जिगाय तम् ।। १३

इत्यादि नारद प्रोक्ततांस्तु वाचमाकर्ण्य फाल्गुनः ।।
अतीव मुदितः प्राह तेष्टामकुशलं कृतः ।। १४

---

१ ब शिक्षितं
२ अ मृतामल
३ अ ब कूलवृत्तिं
४ अ तापकैः

ये ब्राह्मणमते नित्यं ये च ब्राह्मणपूजकाः ।।
अहं च शक्तया नियतस्तीर्थानि विचरन्नहं ।। १५

आगतस्तीर्थ मेतद्धि प्रमोदोऽतीव मेहृदि ।।
तीर्थानां दर्शनं धन्यम् वगाहस्तोऽधिकः ।। १६

माहात्म्य श्रवणं तस्मादौ वापि मुनिरव[१] ब्रवीत् ।।
तदहं श्रोतुमिच्छामि तीर्थस्यास्य गुणान्मुने ।। १७

एतेनैव श्लाघ्यमेतद्यत्त्वयांगीकृतं मुने ।।
त्वं हि त्रिलोकीं विचरन्वेत्सि सर्वांहि सारताम् ।। १८

तदेतत्सर्व तीर्थेभ्योऽधिकं मन्ये त्वदादृतम्[२] ।। १९

नारद उवाच ।।
उचितं तव पार्थैतद्यत्पृच्छसि गुणिन्गुणान् ।।
गुणिनामिव युज्यन्ते श्रोतुं धर्मोद्भवा[३] गुणाः[४] ।।
साधूनां धर्म श्रवणैः कीर्तनैर्याति चान्वहम् ।। २०
पापानाम सदात्मपैरायुर्याति यथान्वहम्[५] ।।
तदहं ~~कीर्ति~~ कीर्तयिष्यामि तीर्थस्यास्य गुणान्बहून् ।। २१

---

१ अ ब मुनिर
२ अ यावृतं
३ ब धर्मभिवान
४ ब गुणान
५ अ वृथात्ययं

यथा श्रुत्वा विजानासि मुक्तर्मंगीकृतं मया ।।
पुराहं विचरन्पार्थ त्रिलोकी[१] कपिलानुगः ।। २२

गतवान्ब्रह्मणो लोकें तत्रापश्यं पितामहम् ।।
स हि राजर्षिदेवर्षि मूर्तामूर्तिः सुसंवृतैः ।। २२

विभाति विमलो ब्रह्मा नक्षत्रैरुडुराडिव ।।
तमहं प्रणिपत्याथ चक्षुषा कृतस्वागतः ।। २४

उपविष्टः प्रमुदितः कपिलेन सहैव च ।।
एतस्मिन्नंतरे तत्र वार्तिकाः समुपागताः ।। २५

प्रहीर्यते[२] हि ते नित्यं जगद्रष्टुं हि ब्रह्मणा ।।
कृतप्रणामानथ तान्समासीनान्पितामहः ।। २६

चक्षुषामृत कल्पेन पलावयन्निव चा ब्रवीत् ।।
कुतं कुत्र विचीर्णं वो दृष्टं श्रुतिमथापि वा ।। २७

किंचिदेवाद्भुतं ब्रूत श्रवणाधेन पुण्यता ।।
एवमुक्ते भगवता तेषां यः प्रवरो मतः ।। २८

---

१ ब त्रिलोक्यं
२ ब प्रहिर्यते

सुश्रवानवाम ब्रह्माणं प्रणिपत्येद मूचिवान् ॥
प्रभौरग्रे च विज्ञप्तिर्यथा दीपो रवे स्तथा[1] ॥ २९

तथापि खलु वाच्यं मे परार्थं प्रेरितेन[2] ते ॥
मुनिः कात्यायनो नाम श्रुत्वा धर्मान्पुनर्बहून् ॥ ३०

सारजिज्ञासया तस्थावेकाऽगुष्ठः शतं समाः ॥
ततः प्रोवाच तं दिव्या वाणी कात्यायन श्रृणु ॥ ३१

पुण्ये सरस्वतीतीरे पृच्छ सारस्वतं मुनिम् ॥
स ते सारं धर्मसाध्यं[4] धर्मज्ञोऽभिवदिष्यति ॥ ३२

इति श्रुत्वा मुनिवरो मुनिश्रेष्ठमुपेत्य तम् ॥
प्रणम्य शिरसा भूमौ पप्रच्छेदं हृदि स्थितम् ॥ ३३

सत्यम् केचित्प्रशंसंति तपः शौचं तथा परे ॥
सांख्यं[5] केचित्प्रशंसंति ~~ब्रवीवे श्रेयश्च सर्वबबु~~ योगमन्ये प्रचक्षते ॥ ३४

क्षमां केचित्प्रशंसंति तथैव भृशमार्ज्जवम् ॥
केचिन्मौनं प्रशंसंति केचिदाहुः परंश्रुतम् ॥ ३५

---

१ अ यथा
२ ब निते
३ अ धम्मानि
४ ब मध्ये
५ अ प्रत्रौ नास्ति ।

सम्यग्ज्ञानं प्रशंसंति केचिद्यागमुत्तमम् ।।
अग्निष्टोमा[2] दिकर्माणि तथा केचित्परं विदुः ।। ३६

आत्मज्ञानं परं केचित्समलोष्टाश्म कांचनम्[3] ।।
इत्थं व्यवस्थिते लोके कृत्याकृत्य विधौ जनाः ।। ३७

व्यामोहमेव गच्छंति किं श्रेय इति वादिनः ।।
यदेतेषु परं कृत्यम् अनुष्ठेयं महात्मभि ः ।। ३८

[illegible] वक्तुमर्हसि धर्मज्ञ मम सर्वार्थ साधकम् ।। ३९

सारस्वत उवाच ।।
यन्मां सरस्वती प्राह सारं वक्ष्यामि तच्छृणु ।।
छायाकारं जगत्सर्वमुत्पत्ति क्षयधर्मि[4] च ।।
वारांगना नेत्र भंगस्तव द्रुतभंगुरमेव तत[5] ।। ४०

धनायुर्यौवनं भोगाम्जलचंद्र वदस्थिरान् ।।
बुद्ध्वा सम्यक् परामृश्य[6] स्थाणु दानं समाश्रयेत[7] ।। ४१

दानवान्पुरुषः पापं नालं कर्तुमिति श्रुतिः ।।
स्थाणुभक्तौ जन्ममृत्यूनाप्नोतीति श्रुतिस्तथा ।। ४२

---

१ अ सम्यक २ अ अग्निहोत्रा
३ अ ब कांचनाः ४ ब भर्मि
५ ब च ।। मुदितपुस्तके "तत इति स्यात् ।।
६ अ ब परामृश्य ७ ब दानयुक्त

सावर्णिना च गाथे द्वे कीर्तिते श्रृणु ये[1] पुरा ।।
वृषो हि भगवान्धर्मो वृषभो यस्य वाहनम् ।। ४३

पूज्यते स महादेवः स धर्मः पर उच्यते ।।
दुःखावर्ते तमोघोरे धर्माधर्म॰जले तथा ।। ४४

क्रोध॰पंके मदग्राहे लोभबुद्बुद संकटे ।।
मान[2] गंभीरं व पाताले सत्वयानि विभूषिते ।। ४५

मज्जंतं तारयत्येको हरः संसार सागरात्[3] ।।
दानं वृत्तं व्रतं वाचः कीर्तिधर्मो तथायुषः ।। ४६

परोपकारणं कायादसारात्सारमुद्धरेत ।।
व धर्मे रागः[4] श्रुतौ चिंता दाने व्यसनमुत्तमम् ।। ४७

इंद्रियार्थेषु वैराग्यम् संप्राप्तं व जन्मनः[5] फलम् ।।
देशेऽस्मिन्भारते जन्म प्राप्य मानुष्यम ध्रुवम् ।। ४८

न कुर्यादात्मनः श्रेयस्तेनात्मा वंचितश्चिरम् ।।
देवासुराणां सर्वेषां मानुष्यमति दुर्लभम् ।। ४९

---

१ अ "मे"

२ अ ब ज्ञान

३ अ सागरे

४ ब रागं

५ ब जन्मने

तत्संप्राप्य तथा कुर्यान्न गच्छेन्नरकं यथा ।।
सर्वस्य मूलं मानुष्यंम् तथा सर्वार्थि साधकम् ।। ५०

यदि लाभे न यत्नस्ते मूलं रक्ष प्रयत्नतः
महता पुण्यमूलयेन[१] क्रीयते कायनौस्त्वया ।। ५१

गंतुं दुःखोदधेः पारं तर[२]यावन्न भिद्यते[३] ।।
अविकारि शरीरत्वंम् दुष्प्राप्यं प्राप्य वै ततः ।। ५२

नापक्रामति संसारादात्महा स नराधमः ।।
तपस्तप्यन्ति यतयो जुह्वते चात्र यज्विनः ।।
दानानि चात्र दीयंते परलोकार्य मादरात् ।। ५३

कात्यायन उवाच ।।
दानस्य तपसो वापि भगवन्किं च दुष्करम्[४]।।
किंवा महत्फलं प्रेत्य सारस्वत ब्रवीहि तत् ।। ५४

सारस्वत उवाच ।।
न दाना दुष्करतरं पृथिव्यामस्ति किंचन ।।
मुने प्रत्यक्षमे वैतद्दृश्यते लोकसाक्षिकम् ।। ५५

परित्यज्य प्रियान्प्राणान्धनार्थे हि महाभयम् ।।
प्रविशंति महालोभात्समुद्रंर्वी गिरिम् ।। ५६

---

१ ब मूलेन
२ ब [illegible] तट
३ अ ब विद्यते
४ अ [illegible] दुःकरं

सेवामन्ये प्रपद्यंते श्ववृत्तिरिति या स्मृता ॥
हिंसाप्रायीं बहुक्लेशां कृषिं चैव तथा परे ॥ ५७

तस्य दुःखार्जितस्येह प्राणेभ्योपि गरीयसः ॥
आयास शतलब्धस्य परित्यागः सुदुष्करः[१] ॥ ५८

यद्ददाति यदश्नाति तदेव धनिनो धनम् ॥
अन्ये मृतस्य क्रीडंति दारैरपि धनैरपि ॥ ५९

अहन्यहनि याचंतमहं मन्ये गुरुं यथा ॥
मार्जनं दर्पणस्येव यः करोति दिनेदिने ॥ ६०

दीयमानं हि नापैति भूय एवाभिवर्धते ॥
कूप उत्सिच्यमानो हि भवेच्छुद्धो बहूदकः ॥ ६१

एकजन्म सुख[२]स्यार्थे सहस्राणि विलापयेत्[३] ॥
प्राज्ञो जन्मसहस्रेषु[४] संचिनोत्येक जन्मनि[५]॥ ६२

मूर्खो हि न ददात्यर्थानिह दारिद्र्य शंकया ॥
प्राज्ञस्तु विसृजत्यर्थानमुत्र तस्य शंकया ॥ ६३

---

१ ब सदुष्कर

२ ब कृत

३ अ ब विलोपयेत

४ ब सहस्राणि

५ अ जन्मतः

किं धनेन करिष्यंति देहिनो भंगुराश्रयाः ।।
यदर्थं धनमिच्छंति तच्छरीरम् शाश्वतम् ।। ६४

अक्षरद्वयमभ्यस्तं नास्तिनास्तीति यत्पुरा ।।
तद् इदं देहिदेहीति विपरीतमुपस्थितम् ।। ६५

बोधयंति च यावंतो[२] देहीति कृपणं जनाः[३] ।।
अवश्यैयम दानस्य मा भूदेवः भवानपि ।। ६६

दातुरेवोपकाराय वदत्यर्थीति देहि मे ।।
यस्माद्दाता प्रयात्यूर्ध्वमधस्तिष्टेत्प्रतिग्रही ।। ६७

दरिद्रा व्याधिता मूर्खाः[४] परप्रेष्यकराः सदा ।।
ब अदत्त दानाज्जायंते दुःखस्यैव हि भाजनाः।।६८

धनवंतमदातारं दरिद्रं वाऽतपस्विनम् ।।
उभावंभसि मोक्तव्यौ कंठे बद्धा महाशिलाम् ।। ६९

शतेषु जायते शूरः सहस्त्रेषु च पंडितः।।
वक्ता शतसहस्त्रेषु दाता जायेत वा न वा ।। ७०

---

१ ब बाध
२ ब याचंते
३ अ प्रती "वंचेः" इति पाठः ।
४ अ मूर्षाः

गाभिर्विप्रैश्च वेदैश्च सतीभिःसत्यवादिभिः ।।
अलुब्धैर्दान शीलैश्च सप्तभिर्धार्यते मही ।। ७१

शिबिरौशीनरो ऽगानि सुतं च प्रियमौरसम् ।।
ब्राह्मणार्थमुपा कृत्य नाकपृष्ठमितो गतः ।। ७२

प्रतर्दनः काशिपतिः[२] प्रदाय नयने स्वके ।।
ब्राह्मणया तुलां कीर्तिमिह चामुत्र चाश्नुते ।। ७३

निमी राष्ट्रं च वैदेहो जामदग्न्यो वसुंधराम् ।।
ब्राह्मणेभ्यो ददौ चापि गयश्चोर्वी सपत्तनाम् ।। ७४

अवर्षति च पर्जन्ये सर्वभूतनिवासकृत् ।।
वसिष्ठो[३] जीवयामास प्रजापतिरिव प्रजाः ।। ७५

ब्रह्मदत्तश्च पांचालयो राजा बुद्धिमतां वरः ।।
निधिं शखं द्विजाग्र्येभ्यो दत्वास्वर्गवाप्तवान्[४] ।। ७६

सहस्त्रजिच्च राजर्षिः प्राणानिष्टान्महायशाः ।।
ब्राह्मणार्थे परित्यज्य गतो लोकाननुत्तमान् ।। ७७

---

१ ब गोभि...
२ अ कासिपति
३ अ वशिष्टो
४ अ यात्

एते चान्ये च बहवः[१] स्थाणोर्दानेन[२] भक्तितः ।।
रुद्रलोकं गता नित्यं शान्तात्मानो जितेन्द्रियाः ।। ७८

एषां प्रतिष्ठिता कीर्तिर्यावत्स्थास्यति मेदिनी ।।
इति संचिन्त्य[३] सारार्थी स्थाणुदानपरो भव ।। ७९

सोऽपि मोहं परित्यज्य तथा कात्यायनोऽभवत् ।। ८०
नारद उवाच ।।
एवं सुश्रवसा प्रोक्तांताम्र कथामाकर्ण्य पद्मभूः ।।
हर्षाश्रुसंयुतोऽतीव प्रशशंस मुहुर्मुहुः ।। ८१

साधु ते व्याहृतं वत्स एवमेतन्न चान्यथा ।।
सत्यं सारस्वतः प्राह सत्या चैवं तथा श्रुतिः ।। ८२

दानं यज्ञानां वरूथं दक्षिणा लोके दातारं-
- सर्व[४]भूतान्युपजीवंति ।।
दानेनारातीनपानुदंत दानेन द्विषंतो मित्रा भवंति ।।
दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदंतीति ।। ८३

संसार सागरे घोरे धर्माधर्मोर्मिसंकुले ।।
दानं[५] तत्र निषेवेत तच्छुभ्रं नौरिव निर्मितम् ।। ८४

---

१ अ बहवो
२ अ दानेनस्थाणु
३ ब संचिंतं
४ अ प्रतौ "सर्व" नास्ति ।
५ अ दाने

इति संचिंत्य च मया पुष्करे स्थापिता द्विजाः ।।
[1] गंगा यमुनयोर्मध्ये मध्यदेशे द्विजाः कृते ।। ८५

[1] स्थापिताः श्री हरिभ्यां तु श्रीमीयविद वित्तमाः ।।
रूद्रेण नागराश्चैव पार्वत्या शक्तिपूर्विकाः ।। ८६

श्रीमाले च तथा लक्ष्म्या हृष्टेवमाद्रि सुरोत्तमैः ।।
नाना ग्रहाशः संदत्ता लोकोद्धरण क्रांक्षया ।। ८७

न हि दानफले कांक्षा काचिन्नो ऽस्ति सुरोत्तमाः ।।
साधुसंरक्षणार्थं हि दानं नः परिकीर्तितम् ।। ८८

ब्राह्मणाश्च कृतस्थाना नानाधर्मोपदेशनैः ।।
समुद्धरंति वर्णास्त्रींस्ततः पूज्यतमा द्विजाः ।। ८९

दानं चतुर्विधं च दानमुत्सर्गः कल्पितं तथा ।।
संश्रुतं चेति विविधं[2] तत्क्रमान्परिकीर्तितम् ।। ९०

वापीकूपतडागानां[3] वृक्ष विद्यासुरौकसाम् ।।
मठ प्रपागृहक्षेत्र दानमुत्सर्ग इत्यसौ ।। ९१

---

१ अ ब प्रतौ "गंगा ------ कृते ।
स्थापिता ------ वित्तमा ।।
इत्ययं श्लोकः नास्ति ।

२ ब त्रिविधं

३ ब तटाकानां

उपजीवभिमान्यत्र पुण्यं कोऽपि चरेन्नरः ।।
अष्ठमंशं स लभते यावद्यो[1] विसृजेद्विजः ।। ९२

तदेषामेव सर्वेषां विप्रसस्थापनं परम्[2] ।।
देवसंस्थापनं चैव धर्मस्तन्मूल एव यत् ।। ९३

देवतायतनं यावद्यावच्च ब्राह्मणगृहम् ।।
तावद्युतः पूर्वजानां पुण्यांशश्चोपतिष्ठति ।। ९४

एतत्स्वल्पं हि वाणिज्यं पुनर्बहुफलप्रदम् ।।
जीर्णोद्धारे च द्विगुणमेतदेव प्रकीर्तितम् ।। ९५

तस्मादिदं त्वहमपि ब्रवीमि सुरसत्तमाः ।।
नास्ति दानसमं किंचित्सत्यं सारस्वती जगौ ।। ९६

नारद उवाच ।।
इति सारस्वतप्रोक्तां तथा पद्मभुवेरिताम् ।।
साधुसाद्वितयमोदतं सुराश्चाहं सुविस्मिताः ।। ९७

ततः सभाविसर्जिते सुरम्ये मेरुमूर्धनि ।।
उपविश्य[3] शिलापृष्ठे अहमेतद चिंतयम् ।। ९८

---

१ अ यावतयो
२ अ वरम्
३ अ उपविष्टः

सत्यमाह[१] विरंचिस्तु स किमर्थं तु जीवति ।।
ये नैकमपि तद्वृत्तं नैव येन कृतार्थता ।। ९९

तदहं दानपुण्यं हि करिष्यामि कथं स्फुटम् ।।
कौपीन दण्डात्मधनो धनं स्वल्पं हि नास्ति मे ।। १००

अनर्हते[२] यद्ददाति न ददाति तथार्हते ।।
अर्हानर्हपरिज्ञानाद्दान धर्मो हि दुष्करः ।। १०१

देशे काले च पात्रे च शुद्धेन मनसा तथा ।।
न्यायार्जितं च यो दद्याद्यौवने स तदश्नुते ।। १०२

तमोवृतस्तु यो दद्याद्भयात्क्रोधात्त थैव च ।।
भुंक्ते दान फलं तद्धि गर्भस्थो नात्र संशयः ।। १०३

बालत्वेऽपि च सो श्राति यद्दत्तं दम्भकारणात्[३] ।।
दत्तमन्यायतो वित्तं तथा वै चार्थकारणम्[३] ।।

तस्माद्देशे च काले च सुपात्रे विधिना नरः[४] ।।
शुभार्जितं प्रयुञ्जीत श्रद्धया शाठ्यवर्जितः ।। १०५

---

१ अ सत्यामाह

२ ब अनर्हिते

३ अ ब कारणात् ।।

४ अ नरैः

तदेतन्निर्धनत्वाच्च कथं नाम भविष्यति ।।
सत्यमाहुः पुरा वाक्यं पुराणमुनयोऽमलाः ।। १०६

नाधनस्यास्त्वयं लोको न परश्च कथंचन ।।
अभिशस्तं[1] प्रपश्यंति दरिद्रं[2] पार्श्वतः स्थितम् ।। १०७

दारिद्र्यं च पातकं लोके कस्तच्छंसितुमर्हति[3] ।।
पतितः शोच्यते सर्वैर्निर्धनश्चापि शोच्यते ।। १०८

यः कृशाश्वः कृशधनः कृशभृत्यः कृशातिथिः[4] ।।
स वै प्रोक्तः कृशोनाम न शरीरकृशः कृशः ।। १०९

अर्थवान्दुष्कुलीनोऽपि लोके पूज्यतमो नरः ।।
शशिनस्तुल्य वंशोऽपि निर्धनः परिभूयते ।। ११०

ज्ञानवृद्धास्तपोवृद्धा ये च वृद्धा बहुश्रुताः ।।
ते सर्वे[5] धनवृद्धस्य द्वारि तिष्ठन्ति किंकराः[6] ।। १११

यद्यप्ययं त्रिभुवने अर्थोऽस्माकं परागृहि ।।
तथाप्यन्यप्रार्थितो हि तस्यैव फलदो भवेत् ।। ११२

---

१ अ ब शस्त्रं
२ अ दारिद्र्यं
३ ब सि
४ ब शाकृतिथिः
५ अ प्रती "त्रावीत" अत आरंभ्यते
६ ब वारिताः

अथवैतत्पुरा सर्वं चिंतयिष्यामि संस्फुटम्[1] ।।
विलोकयामि पूर्वं तु किंचिद्योग्यं हि स्थानकम् ।। ११३

स चिंतयित्वेति बहुप्रकारं देशांश्च
ग्रामान्नगराणि चाश्रमान् ।।
बहून् हं पर्यटन्नोर्व्वीवान्हि स्थानं
हितं स्थापये पत्र विप्रान् । ११४

[2] इति श्री स्कांदे महापुराणे एकाशीतिसाहस्त्र्यां संहितायां प्रथमे माहेश्वर-
-खण्डे कौमारिकाखण्डे नारदार्जुनसंवादे दानप्रशंसावर्णनंनाम द्वितीयोऽध्यायः
।। २ ।।

---

१ अ ब सस्फुटं
२ अ प्रती इत्ययं पाठः नास्ति
ब इति श्री स्कंदपुराणे कुमारिकाखंडे द्वितीयोऽध्यायः ।।